National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 146-149
© 2025 NJHSR
www.sanskritarticle.com

**श्रीअम्लानज्योतिरञ्जनदाशः**
शोधछात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः (आन्ध्रप्रदेशः)

**Correspondence:**
**श्रीअम्लानज्योतिरञ्जनदाशः**
शोधछात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः (आन्ध्रप्रदेशः)

# ऋषिकुल्यामहाकाव्ये ध्वनिवैचित्र्यम्

**श्रीअम्लानज्योतिरञ्जनदाशः**

समग्रे अलङ्कारसाहित्ये ध्वनिवादः एकः गुरुत्वपूर्णमतवादः भवति। अलङ्कारशास्त्रस्य विकाशसरण्यां दीपस्तम्भसदृशः अयं दण्डायमानः एव अतीतसाम्प्रतिकभाविसाधनाय च आलोकयति। ध्वनिवादस्य प्रतिष्ठापकभावेन आचार्यः आनन्दवर्द्धनः स्मरणीयः स्यात्। तथापि तेन स्विक्रियते यत् अयं तावत् तस्य प्रथममाविष्कारकं न, प्रागालङ्कारिकाचार्याः ध्वनिसम्बन्धे अवहिताः आसन्। परन्तु अस्य व्याप्तिविषये स्वातन्त्र्येण स्पष्टशब्देन च ते नोल्लिखितवन्तः। आनन्दवर्धनेन ध्वनिरूपव्यङ्ग्यात्मककाव्यम् उत्तमकाव्यमिति आलोच्यते। सहृदयानां प्रीतिविवर्द्धनाय आलङ्कारिकेन आनन्दवर्धनेन ध्वनेः स्वरूपं व्याप्तिः वैचित्र्यञ्च प्रदर्श्यन्ते। तद्यथा-

**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-**
**स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
**केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**
**तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्॥**[1]

ध्वनिलक्षणनिर्द्धारयितुं तेनोच्यते यत् यत्र वाच्यार्थः वाचकशब्दश्च स्वार्थं गौणीकृत्य अपरैकं मनोरममर्थं प्रकाशयति, तद्काव्यविशेषं ध्वनिरिति कथ्यते। तद्यथा-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**ब्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**[2]

अयं काव्यात्मारूपध्वनिः प्रथमतः द्विधा विभज्यते। अविवक्षितवाच्यः विवक्षितान्यपरवाच्यः चेति। एतौ यथाक्रमं लक्षणामूला अभिधामूला चेति नाम्ना परिचितौ भवतः। तद्यथा-

**भेदौ ध्वनेरपि द्वाबुदीरितो लक्षणाभिधामूलौ।**
**अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥**[3]

अविवक्षितवाच्यध्वनेः भेदद्वयं वर्त्तते। अर्थान्तरसंक्रमितध्वनिः अत्यन्ततिरस्कृतध्वनिश्चेति। विवक्षितान्यपरवाच्यध्वनिरपि द्वाभ्यां विभज्यते। असंलक्ष्यक्रमव्यङ्ग्यध्वनिः, संलक्ष्यक्रमव्यङ्ग्यध्वनिश्चेति। मुख्यतः वस्त्व-लङ्कार-रसभेदैः ध्वनेः त्रिविधता इति यत् साधारणपाठकानां चेतनां संवृतं करोति तदेव विवक्षितान्यपर-वाच्यध्वनिः। यत्र वाच्यार्थव्यङ्ग्यार्थयोः क्रमो लक्ष्यते, तत्र संलक्ष्यक्रमव्यङ्ग्य-ध्वनिर्भवति। अत्र वाच्यार्थस्य प्रतीत्यानन्तरं व्यङ्ग्यार्थस्य प्रतीतिर्भवति। अयं संलक्ष्यक्रमव्यङ्ग्यध्वनिः वस्तुध्वनिः अलङ्कारध्वनिरूपेण च प्रसिध्यति। यत्र च वाच्यार्थव्यङ्ग्यार्थयोः अववोधने कश्चित् क्रमः न संलक्ष्यते, तत्र असंलक्ष्यक्रमव्यङ्ग्य-ध्वनिर्भवति। अर्थात् वाच्यार्थवोधेन सह व्यङ्ग्यार्थवोधः भुयते। साधारणतः असंलक्ष्यक्रमव्यङ्ग्यध्वनिरयं रसध्वनिनाम्ना प्रसिध्यति। सम्प्रत्यत्र पण्डितश्रीरघुनाथ-त्रिपाठिविरचितस्य ऋषिकुल्यामहाकाव्यस्याधारेण वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्च यथा-सम्भवं समीक्ष्य तत्र ध्वनिवैचित्र्यं प्रदर्श्यते।

**वस्तुध्वनिः-** संलक्ष्यक्रमध्वनेः द्वौ भेदौ यथा शब्दशक्तिमूलध्वनिः**,** अर्थशक्तिमूलध्वनिरिति। अर्थशक्तिमूलध्वनिः नाम यत्र शब्दपरिवृत्तिसहिष्णुता सः। स पुनः द्विधा- वस्तुध्वनिः अलंकारध्वनिश्चेति।

तयोः अर्थशक्तिमूलध्वनेः अलङ्कारध्वनिं विहाय अपरः ध्वनिः वस्तुध्वनिः अत्र प्रथममालोच्यते। वस्तु नाम रसालङ्कारभिन्नं वर्णनीयम्। वस्तुध्वनिः पुनः प्रथमतः द्विधा। स्वतस्सम्भविकृतः, कविप्रौढोक्तिकृतश्चेति। तद्यथा-

**प्रौढोक्तिमात्रनिष्पन्नशरीरः सम्भवी स्वतः।**
**अर्थोऽपि द्विविधो ज्ञेयः वस्तुनोऽन्यस्य दीपकः॥**[4]

तयोः स्वतरस्सम्भविकृतः नाम यत्र व्यञ्जकः अर्थः लोकेऽपि सम्भवति, तेन व्यज्यमानः अर्थः प्रधानो भवति। तत्र स्वतस्सम्भ-विकृतवस्तुध्वनिर्भवति। ऋषिकुल्यामहाकाव्ये उदाहरणं यथा-

**विपुलो जनसम्मर्दो जायते तत्र तद्दिने।**
**तत्पवित्रप्रवाहाम्बुस्नानपुण्यार्जनकृते॥**[5]

तत्र तद्दिने पवित्रप्रवाहाम्बुस्नानपुण्यार्जनाय विपुलो जनसम्मर्दो जायते इति लोके प्रत्यक्षादिना अवलोक्यते, अत्र पवित्रप्रवाहाम्बु-स्नानपुण्यार्जनमिति बहुजनसमागमात् दर्शनीयस्थानातिशयः व्यज्यते इति स्वतस्सम्भविकृतवस्तु-ध्वनिः। पुनर्यथा-

**तदात्मजो दाशरथिर्निशङ्क- देवस्वदन्तेऽत्र बभूव भूपः।**
**स जङ्गलं मानवमङ्गलार्थी वासोपयोगाय समीचकार॥**[6]

तत्र तदात्मजो दाशरथिर्निशङ्कदेवः राजा बभूव, स जङ्गलं वासोपयोगाय समीचकार इति लोके प्रत्यक्षादिना अवलोक्यते तेन च मानवमङ्गलार्थी इति राज्ञः परोपकारातिशयः व्यज्यते इति स्वतस्सम्भविकृतवस्तुध्वनिः। पुनश्च यथा-

**प्रवाहितं स्वच्छजलं शीलोच्चया- च्छिलाहतं फेनिलमुच्छलत्तव।**
**पवित्रमित्यत्र विचिन्त्य जन्तवो निरन्तरं स्नान्ति सभुक्तिमुक्तये॥**[7]

तत्र शीलोच्चयाच्छिलाहतं फेनिलमुच्छलत् ऋषिकुल्यायाः स्वच्छजलं प्रवाहितम्, पुनस्तज्जलं पवित्रमित्यत्र विचिन्त्य जन्तवो तत्र निरन्तरं स्नान्ति इति लोके प्रत्यक्ष अवलोक्यते। भुक्तये मुक्तये चेति ऋषिकुल्यायाः स्वच्छजलं पावनातिशयः व्यज्यते इति स्वतस्सम्भविकृतवस्तुध्वनिः।

प्रौढोक्तिमात्रनिष्पन्नशरीरः नाम अलौकिककल्पनया वर्णितेन वस्तुना व्यज्यमानः अर्थः यत्र प्रधानो भवति, तत्र सः प्रौढोक्तिमात्रनिष्पन्नशरीरवस्तुध्वनिः।

प्रौढोक्तिमात्रनिष्पन्नशरीरवस्तुध्वनेः कविप्रौढोक्तिनिष्पन्न-वस्तु-ध्वनिः, कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नवस्तुध्वनिश्च द्वौ भेदौ सूच्येते। तयोः कविप्रौढोक्तिनिष्पन्नवस्तुध्वनेः उदाहरणम् ऋषिकुल्या-महाकाव्ये यथा-

**मुग्धाङ्गनास्तरङ्गिण्यां जलकेलिविचक्षणाः।**
**स्रोतः सरितवस्त्रान्तैर्गोपन्ते जघनस्तनम्॥**[8]

श्लोकेऽस्मिन् मुग्धाः तरुण्यः जलकेलिकाले वस्त्रान्तैः गोपन्ते इति कविप्रौढोक्त्या वस्तुना संदर्शनजनितोल्लास-भावप्रतिफलने यौवनमिति वस्तु चमत्कारं जनयत् ध्वनिव्यपदेश्यतामर्हति इति कविप्रौढोक्तिनिष्पन्नवस्तुध्वनिः। पुनश्च यथा-

**कृषीबलो गायति गीतिमस्य क्षेत्रे तथाऽन्तःपुर एव कान्ता।**
**सुधीः सभायां पथि हृष्टपान्थोऽङ्गनाऽङ्गरङ्गेन च रङ्गमञ्चे॥**[9]

अत्रोत्कलीयकविसम्राडुपेन्द्रभञ्जस्य काव्यप्रतिभा सर्वान् आनन्द-यतीति कविप्रौढोक्त्या वस्तुना गानजनितोल्लास-भावप्रतिफलने कवेरनन्यकाव्यप्रतिभा वस्तु चमत्कारं जनयत् ध्वनिव्यपदेश्यतामर्हति इति कविप्रौढोक्तिनिष्पन्न-वस्तुध्वनिः। कविनिबद्धवक्तृप्रौढोक्ति-निष्पन्नवस्तुध्वनेरुदाहरणं ऋषिकुल्यामहाकाव्ये यथा-

**श्रोणीमस्तकन्यास्ताम्बुकुम्भं वक्षोजकुम्भभाक्।**
**मन्दं मन्दं वधूवृन्दं याति नितम्बगौरवात्॥**[10]

अत्र कविनिबद्धवक्ता नारीणां यौवने स्तनवर्णनं करोति। अम्बुकुम्भं वक्षोजकुम्भभाक् इति वर्णने नितम्बगौरवात् वधूवृन्दं मन्दं मन्दं याति इति कविनिबद्धवक्तृप्रौढोक्तिकृतवस्तुना कान्तानां यौवनातिशयः व्यङ्ग्यः प्रधानतया ध्वनिव्यपदेशभाग्भवति इति कविनिबद्धवक्तृ-प्रौढोक्तिनिष्पन्नवस्तुध्वनिः। पुनश्च यथा-

**भूस्वर्गभोगविषयाकुलकामकान्ता**
**हन्ताऽतिमञ्जुलविलासकलाविचित्रा।**
**भ्रूभङ्गरङ्गरचनाचतुरा यतीनां**
**चित्तं विचालयितुमप्सरसोऽयतन्त॥**[11]

अत्र कविनिबद्धवक्ता भूस्वर्गभोगविषयाकुलकामकान्ता कामक-लायाः वर्णनं करोति। तद्वर्णने मन्मथक्रियाभिः भ्रूभङ्गरङ्ग-रचनादिभिः यतीनां चित्तं विचालयितुमप्सरसोऽयतन्त इति कविनिबद्धवक्तृप्रौढोक्तिकृतवस्तुनाम् अप्सरसां रत्यातिशयः व्यङ्ग्यः प्रधानतया ध्वनिव्यपदेशभाग्भवतीति कविनिबद्धवक्तृप्रौढोक्ति-निष्पन्नवस्तुध्वनिः।

**अलङ्कारध्वनिः-** संलक्ष्यक्रमव्यङ्ग्यध्वनेः अर्थशक्तिमूलवस्तुध्वनिं समीक्ष्य सम्प्रत्यत्र अर्थशक्तिमूला-लङ्कारध्वनिं निरूपयितुम् ध्वन्यालोककारेण आचार्यानन्दवर्धनेनोच्यते, यथा-

**अर्थशक्तिरलंकारो यत्राप्यन्यः प्रतीयते।**
**अनुस्वानोपमव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः॥**[12]

अर्थात् वाच्यालंकारव्यतिरिक्तो यत्र अन्यालंकारोऽर्थसामर्थ्यात् प्रतीयमानोऽवभासते, सोऽर्थशक्त्युद्भवो नामानुस्वानोपमाव्यङ्ग्यः अन्यः अलंकारध्वनिः। ऋषिकुल्यामहाकाव्ये उदाहरणं यथा-

**त्वदीयपीयूषरसप्रसादतो जडस्य भाषा रसनाग्रलासिका।**
**पुनः कथा काऽन्यसतां पुराकृता सरस्वतीति त्वमतः प्रकीर्त्तिता॥**[13]

उदाहरणेऽस्मिन् ऋषिकुल्यायाः जलपानात् जडस्य भाषा रसनाग्रलासिका भवति। अत्र सामान्यात् विशेषष्य वैधर्म्येण समर्थनात् अर्थान्तरन्यासः वाच्यालङ्कारः। सरस्वत्याः कृपया जडस्य भाषा रसनाग्रलासिका स्यादिति ऋषिकुल्या सरस्वती इव। अत्र तु येयं ध्वन्यमानोपमा ऋषिकुल्यासरस्वतीभ्यां जडस्य भाषा रसनाग्रलासिका बहुमान इति सा उपमा निरतिशयचमत्कारं विधत्त इत्युपमायाः प्राधान्यम् इति अलंकारध्वनिः। पुनश्च यथा-

**यस्य स्वभावघनसुन्दरकन्दरौघाः**
**केलीगृहाः किल वनेचरदम्पतीनाम्।**

**लीलाभुवो मृगगजादिपशुव्रजानां**
**रम्यस्थलानि यतिनां परमेश्वराप्तेः॥**[14]

अत्रैकस्य स्वभावघनसुन्दरकन्दरौघाः ग्रहीतॄणां भेदात् वनेचर-दम्पतीनां केलीगृहाः, मृगगजादिपशुव्रजानां लीलाभूमयः, यतिनां परमेश्वराप्तेः रम्यस्थलानि चैवमेव अनेकधाज्ञाने तु उल्लेखः नाम वाच्यालङ्कारः। अत्र तु सुन्दरकन्दरौघाः इत्येकस्योपमेयस्य, केलीगुहाः, लीलाभुवः, रम्यस्थलानीति उपमानैः सह वनेचर-दम्पतीनां रतिप्रदानमिव, मृगगजादिपशुव्रजानां भ्रमणसुखप्रदानमिव, यतिनां परमेश्वराप्तेः अनुरागप्रदानमिव च बहुमान इति सा उपमा निरतिशयचमत्कारं विधत्त इत्युपमायाः प्राधान्यम् इति अलंकारध्वनिः।

शब्दशक्तिमूलो नाम यत्र शब्दपरिवृत्त्यसहिष्णुता विद्यते। तत्र सः शब्दशक्तिमूलालङ्कारध्वनिः भवति। तद्यथा-

**आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते।**
**यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः॥**[15]

महाकाव्ये उदाहरणं यथा-

**अनेकजन्माचितपुण्यसञ्चय- प्रभावतो रम्यतराञ्चलेषु ते।**
**गृहीतजन्माखिलजन्तवः समा-दरेण कालं किल यापयन्त्यहो॥**[16]

अत्र ऋषिकुल्यायाः रम्यान्तरञ्चलस्य वर्णनस्य प्राकरणिके गृहीतजन्माखिलजन्तवः इत्यस्य अप्राकरिणिकार्थस्य प्रतीतौ तयोः अप्राकरणिकप्राकारणिकार्थयोः असम्बद्धाभिधायित्वं मा प्रासाङ्क्षी-दिति तयोः उपमानोपमेयभावः कल्पयितव्यः इति उपमालङ्कारः प्रत्येयः। अयमुपमानोपमेयभावः व्यञ्जनया आक्षेप्यः। तस्यैव प्राधान्यात् शब्दशक्तिमूलालङ्कारध्वनिः। अत्र गृहीतजन्माखिल-जन्तवः इति पदस्य परिवृत्त्यसहत्वात् शब्दशक्तिमूलता। पुनर्यथा-

**मत्तत्पयःपानप्रभावतस्ते सौभाग्यवन्तः प्रतिभान्विताः स्युः।**
**सुधीरवीराः प्रबलप्रभावाः स्वराष्ट्रभक्ता जनसेवकाश्च॥**[17]

अत्र ऋषिकुल्यायाः जलपानप्रभावस्य वर्णनस्य प्राकरणिके स्वराष्ट्रभक्ता जनसेवकाश्च इत्यस्य अप्राकरिणिका-र्थस्य प्रतीतौ तयोः अप्राकरणिकप्राकारणिकार्थयोः असम्बद्धाभिधायित्वं मा प्रासाङ्क्षी-दिति तयोः उपमानो-पमेयभावः कल्पयितव्यः इति उपमालङ्कारः प्रत्येयः। अयमुपमानोपमेयभावः व्यञ्जनया आक्षेप्यः। तस्यैव प्राधान्यात् शब्दशक्तिमूलालङ्कारध्वनिः। अत्र सुधीरवीराः इति पदस्य परिवृत्त्यसहत्वात् शब्दशक्तिमूलता। पुनश्च यथा-

**अट्टालिकालीस्फुटविद्युदाभा नद्यम्बुमध्ये प्रतिविम्बिताऽहो।**
**कीलत्कपाटाट्टविमुक्तकान्ता-निकुञ्जकेलीव विमाति नक्तम्॥**[18]

उदाहरणेऽस्मिन् कीलत्कपाटाट्टविमुक्तकान्तानिकुञ्जकेल्याः वर्णनायाः प्राकरणिके रात्र्याः अप्राकरिणिकार्थस्य प्रतीतौ तयोः अप्राकरणिक-प्राकारणिकार्थयोः असम्बद्धाभिधायित्वं मा प्रासाङ्क्षीदिति तयोः उपमानोपमेयभावः कल्पयितव्यः इति उपमालङ्कारः प्रतीयते। अयमुपमानोपमेयभावः व्यञ्जनया आक्षेप्यते। तस्यैव प्राधान्यात् शब्दशक्तिमूलालङ्कारध्वनिः।

**रसध्वनिः-** अयं ध्वनिः श्रेष्ठध्वनिभावेन निर्णीयते। यतो ह्ययं काव्यस्यात्मेति विचारक्षेत्रे प्रतिष्ठाप्यते। प्रायतः आलङ्कारिकाचार्यैः मतमिदं स्वीक्रियते। विभावानुभावव्यभिचारिसंयोगात् व्यञ्जना-शक्त्या रसः अभिव्यज्यते। वाच्यार्थवोधं व्यङ्ग्यार्थवोधश्चान्तरा क्रमो स्थितोऽपि क्रमः न लक्ष्यते। तदुक्तं यथा-

**अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणात्वात्क्रमोऽवश्यमस्ति,**
**किन्तूत्पलपत्रशतव्यतिभेदवल्लाघवान्नसंलक्ष्यते।**[19]

अर्थात् उन्नतविभावादिभिः प्रस्तुतवाच्यार्थात् अभिव्यक्तव्यङ्ग्य-रूपरसस्य अनुभवकाले क्रमः न लक्ष्यते। सहृदयसामाजिकः वाच्यार्थवोधेन सह व्यङ्ग्यार्थमनुभवति। अनुकुलभावात् प्रतिकुलभावात् वा यः कश्चित् तिरोधातुं समर्थः न भवति। सः स्थायिभावः रसस्योद्गमं प्रति मूलस्वरूपः। तदुक्तम्-

**अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।**
**आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः॥**[20]

स्थायीभावेन परिणतो हि रसः भूयते। नरेषु नराधिपस्य प्राधान्यं यथा, शिष्येषु च गुरोः प्राधान्यं यथा, सर्वेषु भावेषु स्थायीभावस्य प्राधान्यं तथैव वर्त्तते। राज्ञा सह अनेके अनुचराः तिष्ठन्ति। तदानीं राजा नरपतिः आख्यायते, परन्तु अनुचराः अनाख्यायन्ते। तथैव विभावानुभावव्यभिचारिभावाः सर्वे अनुचरतुल्याः। एतैर्भावैर्युक्तोऽपि स्थायीभावः रसः आख्यायते। तदुक्तम्-

**यथा नराणां नृपतिः शिष्याणाञ्च यथा गुरुः।**
**एवं हि सर्वभावानां भावः स्थायी महानिह॥**[21]

अयं रसध्वनिः अष्टविधः। यथा-

**रसभावतदाभासभावशान्त्यदिरक्रमः।**
**ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः॥**[22]

अर्थात् अलक्ष्यक्रमव्यङ्ग्यस्य रस-भाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसन्धि-भावशबलताः अष्टविधाः संकेतिताः। तथाप्यत्र असंलक्ष्यक्रमव्यङ्ग्ये शृङ्गाररसध्वनिः यदि विचार्यते, तर्हि तत्र शृङ्गाररसस्य एकस्मिन् भेदे सम्भोगशृङ्गारे परस्परालिङ्गन-सम्भोगः, परस्पराधरपानसम्भोगः, परस्परपरिचुम्बनसम्भोगादयश्च असंख्यान् भवितुमर्हन्ति। पुनः विप्रलम्भशृङ्गारे, अन्येषु रसेषु च गणयितुम् असम्भवः विद्यते। प्रत्येकञ्च आलम्बनविभाववैचित्र्यादीनां भेदानाम् आधारेण अन्येषां भेदप्रभेदान् गणयितुमपि न शक्यते। अतः एते सर्वे अनन्तभेदत्वात् एक एव परिगृह्यते। तदुक्तं यथा-

**तत्राद्यो रसभावादिरेक एवात्र गण्यते।**
**एकोऽपि भेदोऽनन्तत्वात् संख्येयस्यस्य नैव यत्॥**[23]

रसध्वनिं लक्षयितुं ध्वनिकारेणोक्तं यत्-

**वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।**
**रसादिपरता यत्र स ध्वनेः विषयो मतः॥**[24]

रसादिध्वनिं प्रतिपाद्य, अनेनैव प्राचीनमतानुसारं यत्र रसः भावो वा व्यज्यते, तत्र रसवदाद्यलंकारः इति तन्मतं निरस्य, तस्य अप्रधाने रसादिः अलंकार इति, अर्थात् रसवदाद्यलङ्कारो भवतीति, रसस्य प्राधान्ये रसध्वनिरिति व्यवस्थाप्यते। तद्यथा-

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।**
**काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः॥**[25]

रसस्य प्राधान्यात् एवं असंलक्ष्यक्रमध्वनेः भेदानन्तत्वात् प्रकारः एक एव भवति इति गण्यते ध्वनिकारेण, यथा-

**तस्याङ्गानां प्रभेदाः ये प्रभेदाः स्वगताश्च ये।**
**तेषामानन्त्यमन्योन्यसम्बन्धपरिकल्पने॥**[26]

ऋषिकुल्यामहाकाव्ये असंलक्ष्यक्रमव्यङ्ग्यध्वनेः रसध्वनेर्वा उदाहरणं यथा-

**आक्रान्त एव सहसा प्रसभं सुमुख्या**
**कश्चित् कयाचन मनोभवमत्तया च।**
**सम्पीडितोऽतिघनपीनपयोधराभ्यां**
**हाहन्त! रक्षत हतोऽस्म्यलपद् विलप्य॥**[27]

अत्र वाच्यालंकारः अर्थान्तरन्यासः अङ्गम्, विप्रलम्भशृङ्गारः अङ्गी, अलंकारस्य रसपरता अस्ति। अत्र रसस्य प्राधान्यात् असंलक्ष्यक्रमव्यङ्ग्यध्वनिः। पुनर्यथा-

**इन्दीवराणीह सभास्कराणि वक्त्रारविन्देष्विव सुन्दरीणाम्।**
**नेत्रच्छलेनैव सरःसु भान्ति के प्राप्तमित्रे सति नोल्लसन्ति॥**[28]

अत्रापि च वाच्यालंकारः उत्प्रेक्षा अङ्गम्, विप्रलम्भशृङ्गारः अङ्गी, अलंकारस्य रसपरता अस्ति। अत्र रसस्य प्राधान्यात् असंलक्ष्यक्रमव्यङ्ग्यध्वनिः। पुनर्यथा-

**कश्चिद् बलाद् यतिनमन्यतमाऽपि वामा**
**कामातुरा तदधरादिविचुम्बनेन।**
**आलिङ्ग्य तत् कृतवतीत्यपवित्रमङ्गं**
**मन्त्रैः स तीर्थसलिलैर्वत संस्करोति॥**[29]

उदाहरणेऽस्मिन् यतिनम् अन्यतमायाः वामायाः बलात् अधरादिचुम्बनात् आलिङ्गनाच्च असंलक्ष्यक्रमव्यङ्ग्यध्वनेः शृङ्गार-साभासः ध्वनिः। पुनर्यथा-

**प्रसूनवीथीमधुलुब्धषड्पदा- वलीमनोरञ्जनभूरिगुञ्जनैः।**
**नियोगिचित्तं यदि रागरञ्जितं वियोगिवार्त्ताऽत्र भवेन्न तर्हि किम्॥**[30]

उदाहरणेऽस्मिन् उत्प्रेक्षालङ्कारस्य अङ्गत्वात् रसपरतापि नियोगिचित्तस्य रागरञ्जितव्यञ्जकत्वात् विप्रलम्भशृङ्गार-रसस्य प्राधान्यात् असंलक्ष्यक्रमव्यङ्ग्यध्वनिः। पुनर्यथा-

**मृगेन्द्रभीताः समृगामृगाङ्गनाः पलायमानाः पुरपल्लिकं वनात्।**
**प्रपद्य सुभ्रूशरणं निजाक्षिव- न्नु ताः सखीयन्ति तदक्षिवीक्षणात्॥**[31]

उदाहरणेऽस्मिन् उपमालङ्कारस्य अङ्गत्वात् रसपरतापि मृगेन्द्रमवलम्ब्य मृगाङ्गनानां पलायमानं भयस्थायिभावात् भयानकरसस्य प्राधान्यात् असंलक्ष्यक्रमव्यङ्ग्यध्वनिः। पुनश्च यथा-

**किं वाधिकं विवृणोमि मदनस्य षष्ठो**
**बाणः स वामनयनाप्रचलत्कटाक्षः।**
**उन्मूलनेऽस्य विफलो यतिचित्तमेरोः**
**क्षेत्रे तृणैर्विरहिते पतिताग्निना किम्॥**[32]

उदाहरणेऽस्मिन् वाच्यालंकारः उत्प्रेक्षा अङ्गम्, विप्रलम्भशृङ्गारः अङ्गी, अलंकारस्य रसपरता अस्ति। अत्र रसस्य प्राधान्यात् असंलक्ष्यक्रमव्यङ्ग्यध्वनिः। पुनश्च यथा-

**शरण्ये शरणापन्नदीनपीनार्त्तिहारिणि।**
**वराहरूपिवाराहि! नमस्तेऽभीष्टदेवते॥**
**घोरदंष्ट्र महारौद्रे दंष्ट्रोद्धतवसुन्धरेरो**
**दंष्ट्राध्वस्तहिरण्याक्षे! वाराह्यम्ब! प्रसीद मे॥**[33]

अत्र रूपकालङ्कारस्य वाचकत्वे सति देवीविषयकानुराग-स्थायिभावस्य व्यञ्जकात् भक्तिरसस्य प्राधान्यात् असंलक्ष्यक्रम-व्यङ्ग्य-ध्वनिः। एवमेव ऋषिकुल्यामहाकाव्येऽस्मिन् बहुत्र असंलक्ष्य-क्रमव्यङ्ग्यध्वनिः रसध्वनिर्वा विलसन्ति।

**पादटीका-**

1 ध्वन्यालोकः.1/1
2 ध्वन्यालोकः.1/13
3 ध्वन्यालोकः.4/2
4 ध्वन्यालोकः.2/24
5 ऋषिकुल्या.4/26
6 ऋषिकुल्या.8/61
7 ऋषिकुल्या.3/6
8 ऋषिकुल्या.4/12
9 ऋषिकुल्या.6/136
10 ऋषिकुल्या.4/17
11 ऋषिकुल्या.1/20
12 ध्वन्यालोकः.2/25
13 ऋषि.3/26
14 ऋषि.1/14
15 ध्वन्यालोकः.2/21
16 ऋषिकुल्या.3/24
17 ऋषिकुल्या.2/29
18 ऋषिकुल्या.6/6
19 साहित्यदर्पणः.4/5(वृत्तिभागः)
20 साहित्यदर्पणः.3/174
21 ना.शा.7/8
22 ध्वन्या.2/3
23 सा.द.4/5
24 ध्वन्या.2/4
25 ध्वन्या-2/5
26 ध्वन्या.2/12
27 ऋषि.1/26
28 ऋषि.8/17
29 ऋषि.1/27
30 ऋषि.3/45
31 ऋषि.3/51
32 ऋषि.1/30
33 ऋषि.4/40,41